International Journal of Sanskrit Research 2021; 7(1): 304-306

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2021; 7(1): 304-306
© 2021 IJSR
www.anantaajournal.com
Received: 26-10-2020
Accepted: 05-12-2020

**सोमनाथसाहा**
शोधछात्रः, रामकृष्ण मिशन विद्यामंदिरा, बेलूर मठ, हावड़ा, पश्चिम बंगाल, भारत

**Corresponding Author:**
**सोमनाथसाहा**
शोधछात्रः, रामकृष्ण मिशन विद्यामंदिरा, बेलूर मठ, हावड़ा, पश्चिम बंगाल, भारत

# संस्कृतस्तोत्रसाहित्ये कविविवेकानन्दः

**सोमनाथसाहा**

## प्रस्तावना

यो जगज्जीवनयोरुपलब्धेश्छन्दोबद्ध्योभाषायां रुपं ददाति स एव कविनाम्नाभिधीयते। स कविः नीरवो भवितुमर्हति, पुनो'लेखको'पि। तेन कविना यद्रचितं तदेव संस्कृतसाहित्ये काव्यनाम्ना परिचीयते। अधुना तु कविताभिधयापि भूयते।कविशब्दस्यार्थो हि क्रान्तदर्शी। यस्तु पुरुषः लौकमर्यादामलङ्घयन्नेव रसभाव–वैचित्र्येण लौकिकमपि विषयं लोकान्तरं विदधाति स एव हि भवति कविः । 'कु शब्दे' इति पाठात् शब्दार्थककुधातोः 'अच इः' इत्यनेन उणादिसूत्रेण इप्रत्यये कविशब्दो निष्पद्यते । कविस्वरुपं प्रकरयता ध्वन्यालोककृता आनन्दवर्धनेन ध्वनितम् –

> ''अपारे काव्यसंसारे कविरेकः प्रजापतिः ।
> यथास्मै रोचते विश्वं तथेदं परिवर्तते ''[1]।।

अस्मिन् काव्यसंसारे कविस्तु प्रजापतिः इत्यभिधीयते । काव्यं नाम सहृदयहृदयसंवेद्यं वस्तु किञ्चिद् येन कविसत्तायाः विकाशो जायते। अलौकिकभावनाया कविः यं काव्यं निर्माति तत्तु पाठकाले सहृदयचेतसि आनन्दमुत्पादयति। अत एवोक्तं साहित्यदर्पणे–

> ''करुणादावपि रसे जायते यत् परं सुखम्।
> सचेतसामनुभवः प्रमाणं तत्र केवलम् ''[2]।।

अलंकारतत्त्वविदः रसानुभवं ब्रह्मास्वादसहोदरं मन्यन्ते। ब्रह्मज्ञाने यथा ज्ञातृज्ञेयभेदो न विद्यते रसानुभवे'पि तथैव तन्मयीभावो दृश्यते। तथाहि कथितं साहित्यदर्पणे–

> ''सत्त्वोद्रेकाखण्डस्वप्रकाशानन्दचिण्मयः।
> वेद्यान्तरस्पर्शशून्यो ब्रहमस्वादसहोदरः ''[3]।।

इदानीं विवेकानन्दस्य काव्यानि संस्कृतकाव्यतत्त्वानुसारीणि अभवन्न वेति अधस्ताद् विचार्यते। तदर्थं तु आदौ काव्यशास्त्रलक्षणानि सूक्ष्मेक्षिकया विचार्याणि। तत्र किं नाम काव्यम् इति विचारचर्चायां विबुधाः द्वैविध्यं गणाः। तेषां केचित् शब्दकाव्यवादिनः केचिच्च शब्दार्थकाव्यवादिनः। तेषु व्यासः, दण्डी, जयदेवः, विश्वनाथः, जगन्नाथः प्रमुखा आचार्याः शब्दमेव प्रधानतया काव्यत्वेनोररीकुर्वन्ति। तथाहि कथितमाचार्येण दण्डिना काव्यादर्शे "शरीरं तावदिष्टार्थव्यवच्छिन्ना पदावली"[4] इति। किन्तु भामहः वामनः रुद्रटः आनन्दवर्धनः राजशेखरः कुन्तकः भोजराजः महिमभटटः मम्मटः प्रमुखा आचार्यास्तु शब्दार्थसमूहमेव काव्यमिति प्रतिपादयन्ति।
तथाहि मम्मटाचार्यकृतं काव्यलक्षणम्–

> ''तददोषौ शब्दार्थौ सगुणावनलंकृती पुनः क्वापि ''[5] इति।

भोजराजेणापि समर्थितमिदं मतम्–

> ''निर्दोषं गुणवत् काव्यमलंकाररलंकृतम्।
> रसान्वितं कविः कुर्वन् कीर्तिं प्रीतिञ्च विन्दति''।।

मम्मटमते काव्यशरीरं भवेत् शब्दार्थसमन्वितम् तच्च भवति दोषरहितं गुणयुक्तं अलंकारयुक्तं च। क्वापि च स्फुटालंकारविरहे'पि न काव्यत्वहानिः स्यात्। तथाहि उक्तं – क्वापीत्यनेनैतदाह यतः सर्वत्र सालंकारौ क्वचित्तु स्फुटालंकारविरहे'पि न काव्यत्वहानिः इति।[6]

कुन्तको'पि आह–

''समसर्वगुणौ सन्तौ सुहृदाविव संस्थितौ।
परस्परस्य शोभायै शब्दार्थौ भवतो यथा ''[7]।।

आचार्येण जगन्नाथेनापि उक्तं–

''रमणीयार्थप्रतिपादकः शब्दः काव्यम् '' इति।

अधुना विवेकानन्दः कविपदवीम् आरोढुं शक्नोति न वा इति तु विचार्यम्। तद्विरचितं काव्यमपि दोषरहितं गुणयुक्तं रससमन्वितं छन्दोबद्धम् सालंकारं च। इदं तु ध्येयं यत् आदौ दर्शनम् अनन्तरं वर्णनमिति हि कवेः प्रकृष्टं गुणद्वयम्। सूक्ष्मतया दृष्टा नैपुण्येन यदि कविः वर्णयति तदा तद् वर्णनम् अलौकिकमानन्दं वितनोनि।
"ओम् नमो भगवते रामकृष्णाय" इत्यनेन मन्त्रेण स्वगुरोः रामकृष्णाय प्रणति विहिता विवेकानन्देन। किञ्च तस्य मन्त्रस्य प्रत्येकमपि अक्षरमादाय एकं एकम् पद्यं विरचितं तेन। तच्च स्तोत्रं संस्कृतकाव्यशास्त्रे तस्य पाण्डित्यस्य परिचायकम्। तत्र स्तोत्रं हि–

''ओम् ह्रीं ऋतं त्वमचलो गुणजित् गुणेड्यः
न–क्तन्दिवं सकरुणं तव पादपद्मं।
मो–हकषं वहूकृतं न भजे यतो'हं
तस्मात्त्वमेव शरणं मम दीनबन्धो।।
भ–क्तिर्भगश्च भजनं भवभेदकारि
ग–च्छन्त्यलं सुविपुलं गमनाय तत्त्वम्।
व–क्त्रोद्धृन्तु हृदि मे न च भाति किञ्चित्
तस्मात्त्वमेव शरणं मम दीनबन्धो।।
ते–जस्तरन्ति तरसा त्वयि तृप्ततृष्णाः
रा–गे कृते ऋतपथे त्वयि रामकृष्णे।
म–र्त्यामृतं तव पदं मरणोर्मिनाशं
तस्मात्त्वमेव शरणं मम दीनबन्धो।।
कृ–त्यं करोति कलुषं कुहकान्तकारि
षा–न्तं शिवं सुविमलं तव नाम नाथ।
य–स्मादहं त्वशरणो जगदेकगम्य
तस्मात्त्वमेव शरणं मम दीनबन्धो'' [8]।।

तत्र ओम् ह्रीं इति पदद्वयोपादानाम् श्रीरामकृष्णस्य अभ्यन्तरे पुरूषप्रकृत्योः अभेदः प्रतिपादितः इत्यतः अत्र रूपकं नाम अलंकारः। रूपकलक्षणं लक्षितं मम्मटाचार्येण–

''तद्रुपकमभेदो य उपमानोपमेययोः '' इति।

'गुणजित् गुणेड्यः' इत्यत्र गुणपदेन सांख्यसम्मतं सत्त्वं रजः तम इति गुणत्रयं परामृष्टम्। श्रीरामकृष्णस्तु त्रीन् अपि गुणान् जितवान् इति विवक्षितो'र्थः।
"भक्तिर्भगश्च भजनं भवभेदकारि" इत्यत्र भ–वर्णस्य पुनःपुनः आवृत्या वृत्त्यनुप्रासः। तथा च "तेजस्तरन्ति त्वरितं त्वयि तृप्ततृष्णा" अत्रापि तकारस्य पौनः पुन्येनावृत्या वृत्त्यानुप्रासः। अपि च मर्त्यामृतं अत्रापि तथैव मकारस्य आवृत्या वृत्त्यानुप्रासः। वृत्त्यनुप्रासलक्षणं कथितं साहित्यदर्पणे विश्वनाथेन–

''अनेकस्यैकधा साम्यमसकृद् व्याप्यनेकधा।
एकस्य सकृदप्येष वृत्त्यनुप्रास उच्यते''।।

तेजस्तरन्ति तरसा......... इत्यत्र यदि रामकृष्णे'नुरागः स्यात्तदा किं लभेत इति जिज्ञासायामुक्तं तृप्ततृष्णाः इति। तथाहि तत्रैव सर्वा तृष्णाः तृप्ताः स्युः। अपि चोक्तं तरसा इति। अर्थात् रजोनामकं गुणम् अपि अतिक्रमेत् इति।
विवेकानन्देन विरचितो'यं रामकृष्णप्रणाममन्त्रः अत्यन्तं श्रवणसुखदः तद्धि तस्य कवित्वस्य परिचायक एव। स्वामिना विवेकानन्देन स्वकृतौ जीवानां कर्मफलविषये बहु आलोचितवान्। तन्मते कर्मफलं हि अप्रतिरोध्यं कार्यकारणभावात्मकं च। शुभे कर्मणि कृते फलं शुभम् अशुभे च अशुभम् इत्यस्ति अन्वयव्यतिरेकनियमः। तदर्थमुद्घोषितं शास्त्रेण– "अवश्यमेव भोक्तव्यं कृतकर्म शुभाशुभम् "इति।
अस्मिन् काव्ये कविः विवेकानन्दः गुरोः रामकृष्णस्य जयगानं गीतवान्। उपनिषदि आम्नातम्–'आचार्यवान् पुरुषो वेदः इति'।
अन्यत्रापि उक्तं–

''यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ।
तस्यैते कथिता हयर्थाः प्रकाशन्ते महात्मनः ''।। इति

गुरोः स्पर्शमात्रेण हृदिवान् निःस्वार्थ प्रेमिकः इति तस्य रूपान्तरे जातः।
'रामकृष्णदासा वयं वा माभैः' इत्याख्यमेकं पद्यं विरचितं विवेकानन्देन यत्र स्वगुरुभ्रात्रीन् उद्दिश्य स्वामिना उद्घोषितं यद् वयं सर्वे रामकृष्णस्य दासा एव इति। तत् पद्यं यथा–

''कुर्मस्तारक चर्वणं त्रिभुवनम् उत्पाटयामः वलात्।
किं भो न विजानासि अस्मान् रामकृष्णदासाः ''[9]।। इति

विवेकानन्दः जन्मान्तरवादं विश्वसन् एव कथितवान् यत् महाभारते यो भगवान् कृष्णः अर्जुनं प्रति गीतोपदेशं कृतवान् स एव इदानीं रामकृष्णरुपेणाविर्भूतः इति। गीतायां गीतं भगवता–

''यदा यदा हि धर्मस्य ग्लानिर्भवति भारत
अभ्युथ्थानमधर्मस्य तदात्मनं सृजामह्यम्।।
परित्रानाय साधूनां विनाशाय च दुष्कृताम्
धर्मसंस्थापनार्थाय सम्भवामि युगे युगे ''।।

एतदनुसृत्यैव विवेकानन्देनापि उक्तम्–

''आचण्डालाप्रतिहतरयो यस्य प्रेमप्रवाहः
लोकातीतो'प्यहह न जहौ लोककल्याणमार्गम्।
त्रैलोक्ये'प्यप्रतिममहिमा जानकीप्राणबन्धः
भक्त्या ज्ञानं वृतवरवपुः सीतया यो हि रामः ''[10]।।

मन्दाक्रान्ताछन्दसा विरचितमिदं पद्यम्। अस्मिन् श्लोके विवेकानन्देन कथितं यत् यो रामः स एव कृष्णः स एव हि अस्मिन् शरीरे रामकृष्णः इति। एकस्य उपमेयत्वेन तथा उपमानत्वेन कथनाद् अनन्वयालंकारः। लोकातीतो'प्यहह न जहौ लोककल्याणमार्गम् इत्यस्मिन् श्लोके एक एव लोकशब्दः तात्पर्यभेदवशात् पुनरुक्तः अत एव लाटानुप्रासः। लोकातीत इत्यत्र ब्रह्मणा सह रामकृष्णस्य जगन्मण्डलविधेः व्यङग्यत्वात् विरोधाभासः। भक्त्या ज्ञानम् इत्यत्र च भक्त्या ज्ञानस्य आरोपितत्वात् रुपकालंकारः। द्वितीयश्लोके उक्तम्–

"स्तब्धीकृत्य प्रलयकलितम्वाहवाथ्थं महान्तं
हित्वा रात्रिं प्रकृतिसहजामन्धतामिस्रमिश्राम्।
गीतं शान्तं मधुरमपि यः सिंहनादंजगर्ज
सो'यं जातः प्रथितपुरुषो रामकृष्णस्तदानीम् "।।

अत्र श्लोकस्य प्रत्येकांशे स्वामिजी श्रीरामकृष्णस्य माहात्म्यं वर्णितं कृतवान्।
गुरुविषये निगदितं स्वामिना–

"अद्वयतत्वसमाहितचित्तं
प्रोज्ज्वलभक्तिपटावृतवृत्तं।
कर्मकलेवरमदभूतचेष्टं
यामि गुरुं शरणं भववैद्यम्"।।

अत्र समाहितचित्तं पटावृतवृत्तम् इत्युभयत्र पदलालित्यस्य विलासः विलोक्यते।
कवेरत्राभिप्रायो यत् तस्य गुरुः त्रेतायां रामरुपेण द्वापरे कृष्णरुपेण कलौ च रामकृष्णरुपेण आबिर्भूव इति। त्रेताया रामशब्दः द्वापरस्य कृष्णशब्दः अस्मिन् युगे मिलित्वा रामकृष्ण इति नामपदं जातम्।
वस्तुतः साहित्यसन्दर्भे काव्यरचनायां प्रत्येकमेव कविः प्रजापतितुल्यः 'यथास्मै रोचते तथेदं परिवर्तते' इति।
मम्मटाचार्येण काव्यप्रकाशग्रन्थस्य मङ्गलाचरणे उक्तम्–

"नियतिकृतनियमरहितां ह्रादैकमयीमनन्यपरतन्त्राम्।
नवरसरुचिरां निर्मितिमादधती भारतीकर्वेजयति "[11]।।

तत्र नियतिप्रसङ्गे माणिक्यचन्द्रेण उक्तम्–
नियतिः सर्वपदार्थीनां निज निज संस्थामानवर्णादिव्यवस्था नियमहेतुः दैवपर्यायान्तरम्। तत् कृतेन........................इति।
कविसृष्टेरपरमेकं विशेषणं हि ह्लादैकमयी इति। ब्रह्मणः सृष्टिः सुखदुःखमोहस्वभावा किन्तु कवेः सृष्टिः सर्वदा सुखकरी। अतएव करुणरसादपि सहृदयैः आनन्दः एवानुभूयतजे।
अत उक्तं विश्वनाथेन–

"करुणादपि रसे जायते यत् परम् सुखम्।
सचेतसामनुभवः प्रमाणं तत्र केवलम् "[12]।।

अनन्यपरतन्त्राशब्दस्य व्याख्यानकाले उक्तं काव्यप्रदीपकारेण गोविन्दठक्कुरेण– कवेस्तत्प्रतिभायाश्चान्यो च आत्मानः परस्तदायतत्त्वरहिताम्। यथा ब्रह्मणः सृष्टिः प्रकृतिरेव..................... न तु अण्येषाम्। इति।
ब्रह्मणः सृष्टौ षडेव रसाः मधुराम्लकटुकषायलवणतिक्तभेदात्। कविसृष्टिस्तु नवरससमन्विता। ते च रसा यथा– श्रृङ्गारः हास्य करुणः रौद्रः वीरः भयानकः वीभत्सः अद्भुतः शान्तः चेति।
अतः विलक्षणेयं कवेः सृष्टिः यत्र आनन्द एव आस्वाद्यते।

**भक्तितत्त्वम्–**
शिव कालि अम्बा कृष्णादीनां स्तोत्रकरुपेण स्वामिनो भक्तिर–सस्योद्वेगः दृश्यते।
श्रीमद्भागवते भणितं–

"भयं द्वितीयाभिनिवेशतः स्याद् ईशादपेतस्य विपर्ययो'स्मृतिः।
तन्माययातो वुध आभजेच्च तम् भक्तैकयेशं गुरुदेवतात्मा "।।

**शिवस्तोत्रम्–**
न केवलं स्वगुरोरेव स्तोत्रं विहितं विवेकानन्देनापि तु महादेव स्तोत्रमपि मालिनीछन्दसा तेन महता भक्त्या विरचितम्।

"निखिलभुवनजन्मस्थेमभङगप्ररोहाः
अकलितमहिमानः कल्पिता यत्र तस्मिन्।
सुविमलगगनाभे त्वीशसंस्थे'प्यनीशे
मम भवतु भवे'स्मिन् भासुरो भावबन्धः" [13]।।

सुविमलगगनाभे इत्यत्र उपमालंकारः त्वीशसंस्थेप्यनीशे इत्यत्र च अनुप्रासालंकारः। 'मम भवतु भवे'स्मिन् भासुरो भावबन्धः' इत्यत्र वृत्यनुप्रासादीनां सद्भावसंसृष्टिः। अत्रेदमवधेयं यत् शिवस्तोत्रे षट् श्लोकाः वर्तन्ते। तेषु प्रथमो'यं श्लोकः।

**अम्बास्तोत्रम्–**
भक्तिभावाप्लुतः पूर्णब्रह्मज्ञानी साधकःस्वामी विवेकानन्दः मात्रे'म्बायै वसन्ततिलकछन्दसा भक्तिं निवेदितवान्।

"का त्वं शुभे शिवकरे सुखदुःखहस्ते
आघूर्णितं भवजलं प्रवलोर्मिभङगैः।
शान्तिं विधातुमिह किं बहुधा विभग्नां
मातः प्रयत्नपरमासि सदैव विश्वे" [14]।।

**रामकृष्णप्रणाममन्त्रः–**
अन्ते कविः विवेकानन्दः तस्य गुरवे प्रणामं विनिवेदितवान् अनुष्टुप् छन्दसा–

"ओम् स्थापकाय च धर्मस्य सर्वधर्मस्वरुपिणे।
अवतारवरिष्ठाय रामकृष्णाय ते नमः "।। इति।

अत्र कविना रामकृष्णो धर्मस्थापकत्वेन सर्वधर्मस्वरुपरुपेणा–वतारवरिष्ठत्वेन च स्तूयते।

**तथ्यसूत्राणि–**
1. ध्वन्यालोकः, तृतीयोद्योतः, पृ. 312
2. साहित्यदर्पणः, तृतीयपरिच्छेदः, पृ.58
3. साहित्यदर्पणः, तृतीयपरिच्छेदः, पृ.54
4. काव्यादर्शः, 1/10
5. काव्यप्रकाशः, प्रथमोल्लासः, सू. 1
6. काव्यप्रकाशः–वृत्तिः– प्रथमोल्लासः।
7. वक्रोक्तिजीवितम्, प्रथमोन्मेषः–18
8. वाणी उ रचना (6–9) पृ.197
9. स्वामी विवेकानन्देर कवितासमग्र, पृ.92
10. वाणी उ रचना, पृ. 198
11. काव्यप्रकाशः, 1/1
12. साहित्यदर्पणः, तृतीयपरिच्छेदः, पृ. 312
13. वाणी उ रचना, पृ. 200
14. वाणी उ रचना, पृ. 202

**ग्रन्थपञ्जी**

1. आनन्दबर्धन, ध्वन्यालोकः; सम्पा. आचार्य जगन्नाथ पाठक, वाराणसी : चौखाम्बा विद्याभवन, 1992 पञ्चम संस्करण।
2. काव्यप्रकाशविमर्शः; सम्पा. डा. सुमन कुमार झा. दिल्ली, अभिषेक प्रकाशन, 2007।
3. काव्यमीमांसा; सम्पा. विष्णुपद भट्टाचार्यः, कलकाता, 1982.
4. कुन्तकाचार्यः, वक्रोक्तिजीवितम्; सम्पा. अञजलिका मुखोपाध्याय, कोलकाता : सदेशः, 2010.
5. जगन्नाथः, रसगङ्गाधरः; सम्पा. मधुसूदन शास्त्री. वाराणसी, वेनारस हिन्दु विश्वविद्यालयः।
6. दण्डी. काव्यादर्शः; सम्पा. चिन्मयी चट्टोपाध्याय. कलकाता, पश्चिमवङ्ग राज्य पुस्तक पर्षदः, 1989।
7. प्रार्थना ओ संगीत; वेलुड मठ, रामकृष्ण मिशन सारदापीठ,2007(पञ्चदश संस्करण).
8. विश्वनाथः. साहित्यदर्पणः; डा. विमलाकान्त मुखोपाध्याय. कोलकाता, संस्कृतपुस्तकभाण्डारः, 2008।
9. वसु, प्रमथनाथः. स्वामी विवेकानन्दः; कोलकाता, उद्बोधन कार्यालय, 1413(नवम पुनर्मुद्रण).
10. मम्म्टाचार्यः. काव्यप्रकाशः; डा. विमलाकान्त मुखोपाध्याय, कोलकाता, संस्कृतपुस्तकभाण्डारः.
11. युगनायकविवेकानन्दः; कोलकाता : उद्बोधन कार्यालय, 1384(तृतीय संस्करण).
12. स्वामी विवेकानन्दः, वाणी उ रचना. षष्ठखण्डः, कोलकाता, उद्बोधन कार्यालय, 1420 (पुनर्मुद्रण).
13. स्वामी विवेकानन्देर कवितासमग्र; सम्पा. स्वामी सुपर्णानन्दः, कोलकाता, रामकृष्णमिशनइन्सटिटिउट अव् कालचार, 2014(प्रथम संस्करण).